শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে

# ॥ সুন্দরকাণ্ড ষোডশী ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥ সুন্দরকাণ্ড ষোডশী ॥

ততো রাৱণনীতাযাঃ সীতাযাঃ শত্ৰুকর্ষণঃ।
ইযেষ পদমন্বেষ্টুং চারণাচরিতে পথি॥ ১ ॥

যথা রাঘৱনির্মুক্তঃ শরঃ শ্বসনৱিক্ৰমঃ।
গচ্ছেত্ তদ্বদ্ গমিষ্যামি লঙ্কাং রাৱণপালিতাম্॥ ২ ॥

অর্থসিদ্ধ্যৈ হরিশ্ৰেষ্ঠ গচ্ছ সৌম্য যথাসুখম্।
সমানয চ ৱৈদেহীং রাঘৱেণ মহাত্মনা॥ ৩ ॥

নমোঽস্তু রামায সলক্ষ্মণায
    দেৱ্যৈ চ তস্যৈ জনকাত্মজাযৈ।
নমোঽস্তু রুদ্ৰেন্দ্ৰযমানিলেভ্যো
    নমোঽস্তু চন্দ্ৰাগ্নিমরুদ্গণেভ্যঃ॥ ৪ ॥

পক্ষী চ শাখানিলযং প্ৰৱিষ্টঃ
    পুনঃ পুনশ্চোত্তমসান্ত্বৱাদী।
সুস্বাগতং ৱাচমুদীরযাণঃ
    পুনঃ পুনশ্চোদযতীৱ হৃষ্টঃ॥ ৫ ॥

নমোঽস্তু ৱাচস্পতযে সৱজ্ৰিণে
    স্বযম্ভুৱে চৈৱ হুতাশনায।
অনেন চোক্তং যদিদং মমাগ্ৰতো
    ৱনৌকসা তচ্চ তথাস্তু নান্যথা॥ ৬ ॥

ৱানরোঽহং মহাভাগে দূতো রামস্য ধীমতঃ।
রামনামাঙ্কিতং চেদং পশ্য দেৱ্যঙ্গুলীযকম্॥ ৭ ॥

ত্বমস্মিন্ কার্যনির্ৱাহে প্ৰমাণং হরিযূথপ।
রাঘৱস্তৱতসমারম্ভান্মযি যত্নপরো ভৱেত্॥ ৮ ॥

ত্বমস্মিন্ কার্যনির্যোগে প্ৰমাণং হরিসত্তম।
হনূমন্ যত্নমাস্থায দুঃখক্ষযকরো ভৱ॥ ৯ ॥

যথা চ স মহাবাহুর্মাং তারযতি রাঘৱঃ।
অস্মাদ্ দুঃখাম্বুসংরোধাত্ ত্বং সমাধাতুমর্হসি॥ ১০॥

অস্ত্রৱিজ্জযতাং রামো লক্ষ্মণশ্চ মহাবলঃ।
রাজা জযতি সুগ্রীৱো রাঘৱেণাভিপালিতঃ॥ ১১॥

দাসোহং কোসলেন্দ্রস্য রামস্যাক্লিষ্টকর্মণঃ।
হনূমান্ শত্রুসৈন্যানাং নিহন্তা মারুতাত্মজঃ॥ ১২॥

ন রাৱণসহস্রং মে যুদ্ধে প্রতিবলং ভৱেত্।
শিলাভিশ্চ প্রহরতঃ পাদপৈশ্চ সহস্রশঃ॥ ১৩॥

ধর্ষযিত্বা পুরীং লঙ্কামভিৱাদ্য চ মৈথিলীম্।
সমৃদ্ধার্থো গমিষ্যামি মিষতাং সর্ৱরক্ষসাম্॥ ১৪॥

তদ্ যথা তস্য ৱিক্রান্তমনুরূপং মহাত্মনঃ।
ভৱত্যাহৱশূরস্য তথা ত্বমুপপাদয॥ ১৫॥

ততো মযা ৱাগভিরদীনভাষিণী
শিৱাভিরিষ্টাভিরভিপ্রসাদিতা।
উৱাহ শান্তিং মম মৈথিলাত্মজা
তৱাতিশোকেন তথাতিপীডিতা॥ ১৬॥

॥ ইতি সুন্দরকাণ্ড ষোডশী সমাপ্তা॥